चपितम्-तः, चापितः, चिचपिषितः, चाचपितः-तवान् ;
[1]चपः, चापः, चिचपिषुः, चाचपः ;
चपितव्यम् , चापयितव्यम् , चिचपिषितव्यम् , चाचपितव्यम् ;
चपनीयम् , चापनीयम् , चिचपिषणीयम् , चाचपनीयम् ;
[2]चप्यम् , चाप्यम् , चिचपिष्यम् , चाचप्यम् ;
ईषच्चपः-दुश्चपः-सुचपः ; — —
चप्यमानः, चाप्यमानः, चिचपिष्यमाणः, चाचप्यमानः ;
चापः, चापः, चिचपिषः, चाचपः ;
चपितुम् , चापयितुम् , चिचपिषितुम् , चाचपितुम् ;
चप्तिः, चापना, चिचपिषा, चाचपा ;
चपनम् , चापनम् , चिचपिषणम् ; चाचपनम् ;
चपित्वा, चापयित्वा, चिचपिषित्वा, चाचपित्वा ;
प्रचप्य, प्रचाप्य, प्रचिचपिष्य, प्रचाचप्य ;
चापम् २, } चापम् २, } चिचपिषम् २, } चाचपम् २ ; }
चपित्वा २, } चापयित्वा २, } चिचपिषित्वा २, } चाचपित्वा २. }

## (498) " चप परिकल्कने " (X-चुरादिः-1627. सक. सेट्. उभ.)

### मित् । ज्ञपादिः ।

'चह परिकल्कने' इत्यस्य मैत्रेयरक्षितसम्मतं पाठान्तरमिदम् ।

[3]चपकः-पिका, चिचपयिषकः-षिका ; चपयिता-त्री, चिचपयिषिता-त्री ;
चपयन्-न्ती, चिचपयिषन्-न्ती; चपयिष्यन्-न्ती-ती, चिचपयिषिष्यन्-न्ती-ती;
चपयमानः, चिचपयिषमाणः ; चपयिष्यमाणः, चिचपयिषिष्यमाणः ;
सुचप्-सुचपौ-सुचपः ; — चपितम्-तः, चिचपयिषितः-तवान् ;
चपः, चिचपयिषुः ; चपयितव्यम् , चिचपयिषितव्यम् ;
चपनीयम् , चिचपयिषणीयम् ; चप्यम् , चिचपयिष्यम् ;

---

1. चपः=वृक्षविशेषः इति मैत्रेयरक्षितः । वेणुविशेष इति दण्डनाथः । चपस्य विकारः चापम् । 'तालादिभ्योऽण्' (4-3-152) इति विकारार्थेऽण् ।
2. 'पोरदुपधात्' (3-1-98) इति यत् ।
3. 'ज्ञपादयो मितः' (गणसूत्रम् चुरादौ) इति मित्संज्ञायाम्, 'अत उपधायाः' (7-2-116) इति वृद्धौ सत्यां 'मितां ह्रस्वः' (6-4-92) इति णावुपधाया ह्रस्वः ।